# संस्कृत-वार्ता:

दिनाङ्कः-11.10.2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी अद्य कृषि-सम्बद्ध-क्षेत्रेभ्यः द्विचत्वारिंशत्-सहस्र-कोट्यधिकरूप्यकाणां नैकासां परियोजनानां लोकार्पणं शिलान्यासं च अकरोत्। अत्रावसरे पीएम धन धान्य कृषि योजना' 'द्विदलेषु आत्मनिर्भरताभियानस्य' च शुभारम्भो विहितः।
- रेल-विभागः अवोचत् यत् उत्सवावधौ यात्रिणां सम्मर्दं निध्याय नई दिल्ल्याः अनन्तरं षड् सप्तितिः रेलस्थासनेषु यात्रिसौविध्यकेन्द्राणि निर्मास्यन्ते।
- बिहार-विधानसभा-निर्वाचनेषु आसनवितरणाय अन्तिमरूपप्रदातुं राष्ट्रिय-जनतान्त्रिक-संयुतेः उपवेशनम् अनुवर्तते।
- क्रीडा-मन्त्री डा. मन्सुख् माण्डवीया अद्य नवदिल्ल्याम् ऐषमो विश्व-पैरा-एथलेटिक्स्-चैम्पियन्शिप्-स्पर्धासु पदकविजेतृ-दलं पुरस्कृतवान्।

----------------------------------

<u>प्रधानमन्त्री कृषिक्षेत्रम्</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य कृषि-सम्बद्ध-क्षेत्रेभ्यः द्विचत्वारिंशत्-सहस्र-कोट्यधिक-रूप्यकाणां नैकासां परियोजनानां लोकार्पणं शिलान्यासं च अकरोत्। श्रीमोदी अद्य भारतीय-कृष्यनुसन्धान-संस्थाने आयोजिते कार्यक्रमे पञ्चत्रिंशत्-सहस्र-कोट्यधिक-रूप्यकाणां प्रधानमन्त्री धन-धान्य-कृषि-योजनायाः अथ च द्विदलेषु आत्मनिर्भरताभियानस्य शुभारम्भम् अकरोत्। चतुर्विंशति-सहस्र-कोटि-रूप्यकाणां प्रधानमन्त्री धन-धान्य-कृषि-योजनया कृष्युत्पादकता-संवर्धनं धान्य-विविधीकरणं सतत्-कृषि-पद्धतीनां प्रवर्तनं सेचन-सौविध्ये परिष्कारः अथ च चयनितेषु शत-जनपदेषु दीर्घकालिकाल्पकालिकस्य च ऋणस्य उपलब्धता सुनेश्चेष्यन्ते। अत्रावसरे चत्वारिंशदधिक-चतुश्शतोत्तर-एकादश सहस्र-कोटि-रूप्यकाणां द्विदलेषु आत्म-निर्भरताभियानस्य अपि शुभारम्भो जातः। अस्मिन् कार्यक्रमे प्रधानमन्त्रिणा कृषि-पशुपालन-मत्स्य-पालन-खाद्य-प्रसंस्करण-क्षेत्रेषु सार्धचुश्शतोत्तर-पञ्च-सहस्र-कोट्यधिक-रूप्यकाणां परियोजनानाम् उद्घाटनं विधाय पञ्चदशाधिकाष्टशत-कोटि-रूप्यकाणाम् अतिरिक्त-परियोजनानाम् अपि आधारशिला स्थापिता। श्री मोदी अवदत् यत् भारतम् अद्य दुग्धोत्पादने जगति प्रथम-स्थाने वर्तते। अथ च विश्व-स्तरे द्वितीयः मत्स्योत्पादकः अपि वर्तते।

श्री मोदिना उक्तं यत् देशे षड् नूतन-उर्वरक-संस्थानानि स्थापितानि। विगतेषु एकादश वर्षेषु कृषकेभ्य: पञ्चविंशति-कोटि मृदा-स्वास्थ्य-पत्राणि वितारितानि। प्रधानमत्रिणा उक्तं यत्

एन.डी.ए. सर्वकारस्य कार्यकाले कृषिक्षेत्रस्य आयव्यय-पत्रके प्रतिशतं षड्गुणिता वृद्धिः अभवत्। वस्तुसेवाकरेषु न्यूनतया ग्रामीण-भारतस्य कृषकाः लाभान्विताः अभवन्।

कृषिमन्त्रिणा शिवराज-सिंह-चौहानेन उक्तं यत् आगामि-वस्तुसेवाकर-संशोधने प्रशासनेन कृष्युपकरणेषु वस्तुसेवाकर-मूल्येषु अपचितिं विधाय कृषकेभ्यः साहाय्यं प्रदत्तम् । श्रीचौहानेन उक्तं यत् नरेन्द्र-मोदिनः नेतृत्वयुतेन प्रशासनेन रबी फसलों के न्यूनतम-समर्थन-मूल्ये अपि वृद्धिः कृता।

---------------------------------

अरुणाञ्चले कृषियोजना

अरुणाचल-प्रदेशस्य मुख्यमन्त्री पेमा खाण्डूः सबलम् अवोचत् यत् योजनानां शुभारम्भः प्रभावि-विकासादर्शस्य प्रतिनिधित्वं विदधाति। तेनेदं वक्तव्यम् अद्य ईटानगरे प्रदत्तम्। यत्र असौ प्रधानमन्त्री धन-धान्य-कृषि-योजनायाः द्विदल-क्षेत्रे आत्मनिर्भरतायाभियानस्य च वर्चुअल इति प्रातिभाषिक-शुभारम्भावसरे आयोजितं समारोहं सम्बोधयति स्म।

---------------------------------

प्रधानमन्त्री क्वालकॉम

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदिल्यां क्वालकॉम इत्यस्य अध्यक्षेण मुख्यकार्य-कार्यधिकारिणा च क्रिस्टियानो आर. अमोन इत्यनेन सह मेलनं कृतम्। एकस्मिन् सामाजिक-सञ्चार-पटले श्रीमोदी अलिखत् यत् मेलनावधौ उभाभ्याम् ए.आई इति कृत्रिम-बुद्धिमत्तायाः नवाचारस्य कौशल-विकासस्य च क्षेत्रे भारतस्य प्रगतेः चर्चा कृता। तेन भारतस्य सेमीकन्डक्टर क्षेत्रम् ए-आई इत्यनेन च सम्बद्धान् अभियानान् प्रति क्वालकॉम् इत्यस्य प्रतिबद्धता प्रशांसिता।

---------------------------------

रेलमन्त्री

रेलमन्त्री अश्विनी वैष्णवः अद्य नवदिल्ली रेलवे-स्थासनम् उपेत्य नव-निर्मितस्य यात्री सौविध्य-केन्द्रस्य निरीक्षणम् अकरोत्। श्रीवैष्णवेन उक्तं यत् अनेन सौविध्य-केन्द्रेण यात्रिणां सुगमं गमनागमनं सुनेश्चेष्यते सममेव रेल-स्थासने सम्मर्दः अपि न्यूनो भविष्यति ।

श्री वैष्णवः अवोचत् यत् उत्सवावधौ यात्रिणां सम्मर्दं निध्याय अन्येषु षड्सप्तत्यासनेषु अपि एवमेव सौविध्य-केन्द्राणि निर्मास्यन्ते। रेलमन्त्रिणा उक्तं यत् दीपावलीं छठ पूजां च निध्याय बृहत् -सङ्ख्यायां विशेष-रेलयानानां सञ्चालनस्य योजना निर्मितास्ति। श्री वैष्णवः अवोचत् यत् द्वादश-सहस्र-विशेष-रेलयानेषु सप्तशताधिक-दशसहस्र-रेलयानानि आगामि-पर्वसु चालयिष्यन्ते।

---------------------------------

प्रधानमन्त्री- नानाजी देशमुखः

प्रधानमन्त्री नरेन्द्रमोदी भारतरत्नाय नानाजी देशमुखाय तदीयजयन्त्यवसरे श्रद्धाञ्जलिम् अर्पयत्। सामाजिक-माध्यम-पोस्टे प्रधानमन्त्री उक्तवान् यतं नानाजी देशमुखः एकः दूरदर्शी समाजोन्नायकः, राष्ट्रनिर्माता आजीवनम् स्वावलम्बनस्य ग्रामीण-सशक्तीकरणस्य च समर्थकः आसीत्। नानाजीवर्यस्य जीवनं समर्पणस्य, अनुशासनस्य, समाजसेवायाः च मूर्तरूपम् आसीत्।

----------------------------------

बिहारराजनीतिः-

बिहारे विधानसभानिर्वाचनाय आसनवितरणं निश्चेतुं राष्ट्रियजनतान्त्रिकसंयुतौ विमर्शः प्रचलति। नवदिल्ल्यां भाजपेति दलाध्यक्षस्य जगत प्रकाश नड्डा-वर्यये निवासे इत्यस्य उपवेशनं प्रचलति। अस्मिन् उपवेशने केन्द्रीयमन्त्री भाजपा-दलस्य वरिष्ठो नेता अमितशाहः दलस्य अन्ये नेतारः च उपस्थिताः सन्ति। अस्मिन् उपवेशने बिहारविधानसभायै एन. डी.ए-संयुतौ मध्ये आसनविभाजनस्य व्यवस्थायाः विषये भाजपा-प्रत्याशिनां च नाम्नि अपि चर्चा भविष्यति इति सन्भाव्यते।

विपक्षस्य महासंयुतौ अपि आसनवितरणे तीक्ष्णो वार्तालापः अनुवर्तत।

----------------------------------

माडविया पैरा- एथलिट्स

युवा-कार्यक्रम-क्रीडा-मन्त्रिणः डा. मन्सुख् माण्डवीया अद्य नवदिल्ल्याम् ऐषमो विश्व-पैरा-एथलेटिक्स्- चैम्पियन्शिप्-स्पर्धासु देशाय पदकविजेतृ-दलं पुरस्कृतवान्। अस्मिन् अवसरे डा. माण्डवीयः दलस्य असाधारण-उत्साहस्य दृढनिश्चयस्य, ऐतिह्य-पूर्ण-प्रदर्शनस्य च प्रशंसाम् अकरोत्, येन राष्ट्रस्य गौरवः अभवत्। सः अकथयत् यत् दिव्यांगजनेभ्यः दलेन प्रदत्तः प्रेरकसन्देशः उल्लेखनीयः अस्ति। प्रधानमन्त्रिणा नरेन्द्रमोदिना दर्शितं नवभारतस्य दूरदृष्टिः उत्साहः च सर्वोत्तमरूपेण समर्थ्यते इति। विश्व-पैरा- एथलेटिक्स्- चैम्पियन्शिप्-क्रीडायाः इतिहासे भारतेन स्वस्य सर्वोत्तमं प्रदर्शनं विधाय द्वाविंशति पदकानि विजितानि। एतेषु, षट् स्वर्णपदकानि नव रजतपदकानि सप्त कांस्यपदकानि विद्यन्ते। पदकतालिकायां भारतम् दशमे स्थाने अवर्तत।

।। इति वार्ताः ।।